तु विधिना दहेत् "बुद्धिपूर्व्वम्मृतानां तु त्रिंशत्कृच्छ्रं समाचरेदित्युक्तम्" स्मृतिरत्नावल्यां तु द्विगुणं प्रायश्चित्तं कृत्वार्वागप्यब्दात्सर्वं कार्यमित्युक्तम् आत्मनोघातशुद्ध्यर्थं चरेच्चान्द्रायणद्वयं तप्तकृच्छ्रचतुष्कञ्च त्रिंशत्कृच्छ्राणि वा पुनः। अर्वाक् संवत्सरात्कुर्य्याद्दहनादि यथोदितम् कृत्वा नारायणबलिमनित्यत्वात्तदायुष इति" इदञ्चात्मबधनिमित्तं तत्सज्जातिबधप्रायश्चित्तेन समुच्चितं कार्य्यम्। प्रमादमरणे तु "अथ कश्चित् प्रमादेन म्रियेताग्न्युदकादिभिः तस्याशौचं विधातव्यं कर्त्तव्या चोदकक्रिया" इत्युक्तेः सर्वं कार्य्यं तत्र तु "तोयाग्निन्दपशोविप्रैरन्यच्चञ्चात्मघातिनाम्" याज्ञवल्क्येन सद्यःशौचं विहितं प्रागुक्तवचने त्र्यहाशौचमिति तत्र त्र्यहाशौचसद्यःशौचयोर्विकल्पइति भेदः। त्र्यहाशौचमिति रघुनन्दनादयः। सद्यःशौचमिति मिताक्षरा। ण्वुल् आत्मघातकोऽप्यत्र त्रि०।

**आत्मघोष** पु० आत्मानं घोषयति स्वशब्दैः। १काके, २कुक्कुटे, च, ताभ्यां हि (का का) (कु कु) स्वस्वध्वनिनैवात्मनामैकदेशो घोष्यते इति तयोस्तथात्वम्।

**आत्मज** पु० आत्मनो मनसो देहाद्वा जायते, आत्मा वा जायते जन—ड। १मनोभवे २पुत्रे च "अङ्गादङ्गात् सम्भवति पुत्रवत् दुहिता नृणामिति" स्मृतिः "आत्मा वै जायते पुत्र इति" श्रुतिः ३कन्यायां, ४मनोजन्यायां बुद्धौ च स्त्री। "चलिताः पुरःपतिमुपैतुमात्मजाः" माघः वन्द्यं युगं चरणयोर्जनकात्मजायाः" रघुः। क्त। आत्मजातोऽप्यत्र पुंस्त्री०।

**आत्मजन्मन्** पु० आत्मनो जन्म यस्य। अपत्ये 'अत आहर्त्तुमिच्छामि पार्वतीमात्मजन्मने" कुमा०। "तमात्मजन्मानमजं चकार" रघुः। ६त०। पुत्ररूपात्मोपत्तौ न० "तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः" रघुः।

**आत्मज्ञान** न० आत्मनोज्ञानम्। यथार्थरूपेणात्मनो ज्ञाने तज्ज्ञानस्य च मोक्षसाधनत्वं श्रुतावुक्तम् "अभयं वै जनक! प्राप्तोऽसि येनात्मानमेवावेः" "महान्तं विभुमात्मानं मत्वा धीरो न शोचति" श्रुतिः आत्मस्वरूपञ्च आत्मशब्दे वक्ष्यते तस्य इतरस्मात् भेदज्ञानं यथास्वरूपज्ञानञ्चात्मज्ञानम् तच्च साक्षात्काररूपम् तस्यैव मोक्षसाधनत्वात् 'आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान्"। "सर्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम्। तद्ध्यग्र्यं सर्वविद्यानां प्राप्यतेऽह्यमृतं यतः" इति च मनुः। ६त०। आत्मबोधादयोऽप्यत्र।

**आत्मतत्त्व** पु० आत्मनस्तत्त्वम्। आत्मनो यथार्थस्वरूपे १चैतन्यरूपे मतभेदे२कर्त्तृत्वादिरूपे। आत्मतत्त्वं च उदयनाचार्यैः चार्व्वाकादिमतनिरसनेन आत्मतत्त्वविवेके दर्शितम् यथा "इह खलु निसर्गप्रतिकूलस्वभावं सर्व्वजनसंवेदनसिद्धं दुःखं जिहासवः सर्वएव तद्धानोपायमविद्वांसोऽनुसरन्तः सर्वाध्यात्मविदेकवाक्यतया तत्त्वज्ञानमेव तदुपायमाकर्णयन्ति न ततोऽन्यम्, प्रतियोग्यनुयोगितया आत्मैव तत्त्वतोज्ञेयः। तथाहि यदि नैरात्म्यं यदि वात्मास्ति वस्तुभूत उभयथापि नैसर्गिकमात्मज्ञानमतत्त्वज्ञानमेवेत्यत्राप्येकवाक्यतैव वादिनाम् अत आत्मतत्त्वं विविच्यते इत्यादिना, विस्तरस्तु तत्रैव अवगन्तव्यः आत्मैव तत्त्वं परमपदार्थः। २आत्मरूपे परमपदार्थे च।

**आत्मतुष्टि** स्त्रि० आत्मन्येव तुष्टिरस्य। आत्ममात्रज्ञानलाभेन १प्राप्ततुष्टौ आत्मज्ञे ब्रह्मविदि। ६त०।२आत्मनः सन्तोषे स्त्री। सा च विकल्पविषये धर्म्मे प्रमाणम् "वेदोऽखिलो धर्म्ममूलं स्मृतिशीले च तद्विदाम्। आचारश्चैव साधूनामात्मनस्तुष्टिरेव चेति" मनूक्तेः। [घातिनि आत्मघातिशब्दे उदाहरणम्

**आत्मत्यागिन्** त्रि० आत्मानं देहं त्यजति त्यज-घिनुण्। आत्म-

**आत्मदर्श** पु० आत्मा देहः दृश्यतेऽत्र दृश—आधारे घञ्। १दर्पणे आदर्शे हेम०। 'प्रसादमात्मीयमिवात्मदर्शः" रघुः। भावे घञ् ६त०।२आत्मनोदर्शने आत्मसाक्षात्कारे।

**आत्मदर्शन** न० आत्मा दृश्यते साक्षात्क्रियतेऽनेन दृश—करणे ल्युट् ६त०। आत्मसाक्षात्कारसाधने १श्रवणे २मनने ३निदिध्यासने, "आत्मा वा अरे द्रष्टव्यः श्रोतव्योमन्तव्योनिदिध्यासितव्यः" इति श्रुतौ साक्षात्कारसाधनतया श्रवणादीनां त्रयाणां विधानात् तेषां तथात्वम् "श्रोतव्यः श्रुति वाक्येभ्यो-मन्तव्यश्चोपपत्तिभिः" इत्युपक्रम्य "एते दर्शनहेतव" इत्युक्तेश्च तेषां तथात्वम् भावे ल्युट्। २आत्मसाक्षात्कारे 'एष वै परमोधर्म्मो यद्योगेनात्मदर्शनम्', ३आत्मत्वेन सर्वभूतेषु ज्ञाने च "स्वप्नालोकालम्भविगमः सर्वभूतात्मदर्शनम्" या०।

**आत्मद्रोहिन्** त्रि० आत्मने द्रुह्यति द्रुह-णिनि। आत्मघातिनि

**आत्मध्यान** न० आत्मनोध्यानम् योगविशेषः। आत्मसाक्षात्कारसाधने मानसवृत्तिभेदे। तत्प्रकारश्च शङ्खस्मृतौदर्शितः "ध्यानं प्रोक्तं प्रवक्ष्यामि सर्वस्माद्योगतः शुभम्। हृदिस्थादेवताः सर्वा हृदि प्राणाः प्रतिष्ठिताः। हृदि ज्योतींषि भूयश्च हृदि सर्वं प्रतिष्ठितम्। स्वदेहमरणिं कृत्वा प्रणवञ्चोत्तरारणिम्। ध्याननिर्म्मथनाभ्यान्तु विष्णुं पश्येद्धृदि स्थितम्। हृद्यर्कश्चन्द्रमाः सूर्य्यः सोममध्ये हुताशनः। तेजोमध्ये स्थितं तत्त्वं तत्त्वमध्ये स्थितोऽच्युतः। अणो-